रुद्रयामले तंत्रे वज्रपंजराख्यं सूर्यकवचम्

१००५

२पत्रे

नं० ५० ०५६
रुद्रयामले हेतं
सूर्यकवचं
वज्रपंजरं

२ पत्रे
संपूर्ण

श्रीगणेशायनमः ॐश्रीसूर्यायनमः ओं याऽदेवदेवैर्भगवान्भास्करोमहसां
निधिः गायत्रीनायकोभास्वान्सवितेतिप्रगीयते तस्याहंकवचंदिव्यंवज्रपं
जरकाभिधं सर्वमंत्रमयंगुह्यंमूलविद्यारहस्यकं सर्वपापहरंदेवि दुःखदा
रिद्र्यनाशनं महाकुष्टहरंदेवि सर्वरोगनिबर्हणं सर्वशत्रुसमूहघ्नं संग्रामे
विजयप्रदं सर्वतेजोमयंसर्वदेवदानवपूजितं रणेराजभयेघोरेसर्वोपद्रव
नाशनं मातृकावेष्टितंवर्मभैरवाननर्निर्गतं महपीडाहरंदेवि सर्वसंकटना
शनं धारणादस्यदेवेशिब्रह्मालोकपितामहः विष्णुर्नारायणोदेविरणेदैत्यान्
जयिष्यति शंकरःसर्वलोकेशेवासवोपिदिवस्पतिः ॐपदेश शशीदेविशि ओषधीशः
वोहंभैरवीश्वरः मंत्रात्मकंपरंवर्मसवितुःसारमुत्तमं योधारयेद्भुजेमूर्ध्नि र
विवारेमहेश्वरि सराजवल्लभोलोकेतेजस्वीवैरिमर्दनः बहुनोक्तेनकिंदेवि
कवचस्यास्यधारणात् इहलोकेधनारोग्यवृद्धिर्भवतिनान्यथा कवचस्या
स्यसुभगेमूलविद्यामयस्यच वज्रपंजरकाख्यस्यमुनिर्ब्रह्मासमीरितः गा
यत्र्यंछंदइत्युक्तंदेवतासवितास्मृतः मायाबीजंशरत्शक्तिर्नमः कीलकमी
श्वरि सर्वार्थसाधनेदेवि विनियोगःप्रकीर्तितः ओंअस्यश्रीवज्रपंजर
काख्यस्यसूर्यकवचस्य श्रीब्रह्माऋषिः गायत्र्यंछंदः श्रीसवितादेवता

परत्रपरमामुक्तिर्दैवानामपिदुर्लभा॥५

सू० ह्रीं बीजं सः शक्तिः नमः कीलकं सर्वार्थसाधने सूर्यकवचपाठे विनियोगः।
१ अथ ध्यानं गायत्री तत्पुरुषाय विद्महे भास्कराय धीमहि तन्नः सूर्यः प्रचोदया
त् ३ अथ ध्यानम् ॐ मणिमुकुटमरीचिस्फीतभास्वल्ललाटं कनककलशा
हस्तांभोजहस्तारविंदं निखिलनिगमगम्यं विस्फुरालिंगितांगं मनसि सरसि
जे हं सूर्यमीशं नमामि ओं अं आं इं ईं शिरः पातु ओं सूर्यो मंत्रविग्रहः उं ऊं ऋं ॠं
ललाटं मे ह्रां रविः पातु चिन्मयः ऌं ॡं एं ऐं पातु नेत्रे ह्रीं ममारुणसारथिः ओं औं
अं अः श्रुती पातु सः सर्वजगदीश्वरः कं खं गं घं पातु गंडौ सूं सूर्यः सुरपूजितः
पं चं छं जं झं पातु ञं नासां मे पातुँ मर्यमा प्रभुः टं ठं डं ढं मुखं पायाद्यं योगीश्वरपूजि
तः तं थं दं धं गलं पातु नं नारायणवल्लभः पं फं बं भं मम स्कंधौ पातु मं महसां
निधिः यं रं लं वं भुजौ पातु मूलं सकलनायकः शं षं सं हं पातु वक्षो मूलमंत्र
मयो ध्रुवः ळं क्षः कुक्षिं सदा पातु ग्रहनाथो दिनेश्वरः ङं ञं णं नं मं मे पातु पृष्ठं
दिवसनायकः अं आं इं ईं उं ऊं ऋं ॠं नाभिं पातु तमोपहः ऌं ॡं एं ऐं ओं औं अं
अः लिंगं मे व्याद्ग्रहेश्वरः कं खं गं घं चं छं जं झं कटिं भानुर्ममावतु टं ठं डं ढं तं थं
सू दं धं जानू भास्वान्मममावतु पं फं बं भं यं रं लं वं जंघे मे व्याद्विभाकरः शं षं सं हं ळं १
क्षः पातु मूलं पादौ त्रयीतनुः ङं ञं णं नं मं मे पातु सविता सकलं वपुः सोमः पू

र्वे च मे पातु भौमो ग्नौ मां सदावतु बुधो मां दक्षिणे पातु नैरृत्यां गुरुरेव मां पश्चि
मे मां सितः पातु वायव्यां मां शनैश्चरः उत्तरे मां तमः पायादैशान्यां मां शिखी त
था ऊर्ध्वे मां पातु मिहिरो मामधस्ताज्जगत्पतिः प्रभाते भास्करः पातु मध्याह्ने मां दि
नेश्वरः सायं वेदप्रियः पातु निशीथे विस्फुरापतिः सर्वत्र सर्वदा सूर्यः पातु मां च
क्रनायकः रणे राजकुले द्यूते विवादे शत्रुसंकटे संग्रामे च ज्वरे घोरे पातु मां स
विता प्रभुः ॐ ॐ ॐ उरखं उखुह समयः सूर्यो वतां मां भयात् ह्रां ह्रीं ह्रुं हहहा हसौः ह
हंसो × सहसौं वतात्सर्वतः सः सः सः ससससो न पाद्धन चरा शौरा द्रूणात् संकटात् पाया
न्मां कुलनायकोपि सविता ॐ ह्रीं हसौ सर्वदा ह्रां ह्रीं ह्रूं दद तत्तं तथा चतरणि भौ भैं
भयाद्भास्करो रां रीं रूं रू रू रूं रविज्ज्वरभयात्कुष्ठान्यूमूलामयात् अं अं आं विवि
वीमहामयमयां मां पातु मार्त्तण्डको मूलं व्याप्ततनुः सदावतु परं हंसः सहस्रांशु
मान् इतीदं कवचं दिव्यं वज्रपंजरकाभिधं सर्वदेवरहस्यं च मातृकामंत्रवेष्टि
तं महारोगभयघ्नं च पापघ्नं मन्मुखोदितं गुह्यं यशस्करं पुण्यं सर्वश्रेयस्करं
शिवे लिखित्वा रविवारे तु तिष्ये वा जन्मभे प्रिये अष्टगंधेन दिव्येन सुधाक्षी
रेण पार्वती अर्कक्षीरेण पुण्येन भूर्जत्वचि महेश्वरि कनकीकाष्ठलेखिन्या क
वचं भास्करोदये श्वेतसूत्रेण रक्तेन श्यामेनावेष्टयेद्गुटीं सौवर्णेनाथ संवेष्ट्य

स० धारयेत्मूर्ध्नि वा भुजे रणे रिपुं जयेद्देवि वादे स दक्षिणे ब्यापिति राजमान्यो भवे
२ न्नित्यं सर्वतेजोमयो भवेत् कंठस्था पुत्रदा देवि कुक्षिस्था रोगनाशिनी शिरस्था
२ गुटिका दिव्या राजलोकवशंकरी भुजस्था धनदा नित्यं तेजोबुद्धिविवर्धिनी वं
ध्या वा काकवंध्या वा मृतवत्सा च यांगना कंठे संधारयेन्नित्यं बहुपुत्रं प्रजायते
यस्य देहे भवेन्नित्यं गुटिकैषा महेश्वरी महास्त्राणीद्रमुक्तानि ब्रह्मास्त्रादीनि या
र्वती तद्देहं प्राप्य व्यर्थानि भविष्यंति न संशयः त्रिकालं यः पठेन्नित्यं कवचं व
ज्रपंजरं तस्य सद्यो महादेवि पूजयेयस्त्रयीतनुं तस्य पूजार्जितं पुण्यं जन्मकोटि
षु निष्कलं शतावर्तं पठेद्धर्मे सप्तम्यां रविवासरे महाकुष्ठार्दितो देवि मुच्यते ना
त्र संशयः निरोगो यः पठेद्धर्मे दरिद्रो वज्रपंजरं लक्ष्मीवां जायते देवि सद्यः सू
र्य प्रसादतः भक्त्या यः प्रपठेद्देवि कवचं प्रत्यहं प्रिये इह लोके श्रियं भुक्त्वा देहांते
मुक्तिमाप्नुयात् इति श्रीरुद्रयामले तंत्रे वज्रपंजराख्य सूर्यकवचं संपूर्णम्
॥५३ शुभं भवतु ॥

सवितावरदो भवेत् अज्ञात्वा कवचं देवि ५४

वृ सा

२